# AdishankarAchAryapUjAvidhI

# આદિશંકરાચાર્યપૂજાવિધી

## Document Information

Text title : Sri Adi Shankaracharya Puja Paddhati

File name : AdishankarAchAryapUjA.itx

Category : pUjA, svara, shankarAchArya

Location : doc_z_misc_shankara

Author : Compiled by Harsha Ramamurthy (harshanandanatha)

Transliterated by : Harsha Ramamurthy (harsha_ramamurthy at mail.com)

Description-comments : Traditional

Latest update : January 03, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# આદિશંકરાચાર્યપૂજાવિધી

॥ શ્રીશઙ્કરભગવત્પાદ પૂજાવિધિઃ ॥

॥ શ્રીમદખણ્ડવરસિદ્ધશ્રીશઙ્કરાનન્દનાથસદ્ગુરુશ્રીપાદુકાભ્યો નમઃ ॥

[ભસ્મ - રુદ્રાક્ષધારી ઉદઙ્મુખઃ પૂજોપકરણાનિ સંભૃત્ય
પૂજામારભેત્ ]
ૐ અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોઽપિ વા ।
યઃ સ્મરેત્પુણ્ડરીકાક્ષં સ બાહ્યાભન્તરઃ શુચિઃ ॥

[આચમ્ય]
ૐ ધ્રુવં તે રાજા વરુણો ધ્રુવં દેવો બૃહસ્પતિઃ ।
ધ્રુવન્ત ઇન્દ્રશ્ચાગ્નિશ્ચ રાષ્ટ્રં ધારયતાં
ધ્રુવમ્ ॥

નમો બ્રહ્મણ્યદેવ્યાય ગોબ્રાહ્મણહિતાય ચ ।
જગદ્ધિતાય કૃષ્ણાય ગોવિન્દાય નમો નમઃ ॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુદેવો મહેશ્વરઃ ।
ગુરુઃ સાક્ષાત્પરં બ્રહ્મ તસ્મૈ શ્રીગુરવે નમઃ ॥

સુમુખશ્ચૈકદન્તશ્ચ કપિલો ગજકર્ણકઃ ।
લમ્બોદરશ્ચ વિકટો વિઘ્નરાજો ગણાધિપઃ ॥

ધૂમ્રકેતુર્ગણાધ્યક્ષો ભાલચન્દ્રો ગજાનનઃ ।
દ્વાદશૈતાનિ નામાનિ યઃ પઠેચ્છૃણુયાદપિ ॥

વિદ્યારમ્ભે વિવાહે ચ પ્રવેશે નિર્ગમે તથા ।
સઙ્ગ્રામે સઙ્કટે ચૈવ વિઘ્નસ્તસ્ય ન જાયતે ॥

અભીપ્સિતાર્થસિદ્ધ્યર્થં પૂજિતો યઃ સુરૈરપિ ।
સર્વવિઘ્નચ્છિદે તસ્મૈ ગણાધિપતયે નમઃ ॥

આગમાર્થં તુ દેવાનાં ગમનાર્થં તુ રક્ષસામ્ ।
દેવતાપૂજનાર્થાય ઘણ્ટાનાદં કરોમ્યહમ્ ॥ [ઇતિ ઘણ્ટાનાદં
કૃત્વા]
ભૂતોત્સારણમ્
અપસર્પન્તુ તે ભૂતા યે ભૂતા ભૂમિસંસ્થિતાઃ ।
યે ભૂતા વિઘ્નકર્તારઃ તે નશ્યન્તુ શિવાજ્ઞયા ॥

અપક્રામન્તુ ભૂતાનિ પિશાચાસ્સર્વતો દિશમ્।
સર્વેષામવિરોધેન પૂજાકર્મ સમારભે ॥

આસનવિધિઃ
આસનમહામન્ત્રસ્ય પૃથિવ્યા મેરુપૃષ્ઠઃ ઋષિઃ કૂર્મો દેવતા
સુતલં છંદઃ આસને વિનિયોગઃ ॥

ૐ પૃથ્વિ ત્વયા ધૃતા લોકા દેવિ ત્વં વિષ્ણુના ધૃતા ।
ત્વં ચ ધારય માં દેવિ પવિત્રં કુરુ ચાસનમ્ ॥

[મનુષ્યગન્ધ નિવારણાર્થં યેભ્યો માતેતિ મન્ત્રં જપેત્]
ૐ યેભ્યો॑ મા॒તા મધુ॑મ॒ત્પિન્વ॑તે॒ પયઃ॑ પી॒યૂષં॒
ધૌરદિ॑તિ॒રદ્રિ॑ બર્હાઃ । ઉ॒ક્થ શુ॑ષ્માન્
વૃષ॒ભરાન્ત્સ્વપ્ન॑ સ॒સ્તાઁ આ॒દિત્યાઁ અનુ॑મદા
સ્વ॒સ્ત॑યે । એ॒વા પિ॒ત્રે વિ॒શ્વદે॑વાય॒ વૃષ્ણે॑
ય॒જ્ઞૈ॑ર્વિધેમ॒ નમ॑સા હ॒વિર્ભિઃ॑ । બૃહસ્પ॑તે સુપ્ર॒જા
વી॒રવ॑ન્તો વ॒યં સ્યા॑મ॒ પત॑યો રયી॒ણામ્ ॥

ૐ શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોઽપશાન્તયે ॥

[પ્રાણાનાયમ્ય]
[દેશકાલૌ સંકીર્ત્ય]મમોપાત્ત સમસ્ત દુરિતક્ષયદ્વારા
શ્રીપરમેશ્વર પ્રીત્યર્થં અસ્માકં સકુટુંબાનાં ક્ષેમ સ્થૈર્ય
વિજય વીર્ય અયુરારોગ્યૈશ્વર્યાભિવૃદ્ધ્યર્થં
સર્વારિષ્ટશાન્ત્યર્થં સર્વાભીષ્ટસિદ્ધ્યર્થં
શ્રીશઙ્કરભગવત્પાદ પ્રસાદ સિદ્ધ્યર્થં શ્રીશઙ્કરાચાર્ય
ચરણારવિન્દયોઃ અચઞ્ચલ નિષ્કામ નિષ્કપટ ભક્તિસિદ્ધ્યર્થં

યથાશક્તિ ધ્યાનાવાહનાદિ ષોડશૈરુપચારૈઃ
શ્રીમચ્છઙ્કરભગવત્પાદ પૂજાં કરિષ્યે ॥ તદઙ્ગત્વેન કલશ
- શંખ - આત્મ - પીઠ પૂજાં ચ કરિષ્યે ॥

॥ કલશાર્ચનમ્ ॥

શ્રીકલશાય નમઃ । દિવ્યગન્ધાન્ધારયામિ ॥

[કલશં ગન્ધાક્ષત પત્ર પુષ્પૈરભ્યર્ચ્ય પરિમલદ્રવ્યાણિ
નિક્ષિપ્ય કલશં હસ્તેનાચ્છાદ્ય]
ૐ કલશસ્ય મુખે વિષ્ણુઃ કણ્ઠે રુદ્રઃ સમાશ્રિતઃ ।
મૂલે તત્ર સ્થિતો બ્રહ્મા મધ્યે માતૃગણાઃ સ્મૃતાઃ ॥

કુક્ષૌ તુ સાગરાઃ સર્વે સપ્તદ્વીપા વસુન્ધરા ।
ઋગ્વેદોઽથયજુર્વેદઃ સામવેદોઽપ્યથર્વણઃ ॥

અઙ્ગૈશ્ચ સહિતાઃ સર્વે કલશામ્બુ સમાશ્રિતાઃ ।
ગાયત્રી ચાત્ર સાવિત્રી શાન્તિઃ પુષ્ટિકરી તથા ॥

ગઙ્ગે ચ યમુને ચૈવ ગોદાવરિ સરસ્વતિ ।
નર્મદે સિન્ધુ કાવેરિ જલેઽસ્મિન્ સન્નિધિં કુરુ ॥

સર્વે સમુદ્રાઃ સરિતઃ તીર્થાનિ જલદા નદાઃ ।
આયાન્તુ ગુરુપૂજાર્થં દુરિતક્ષયકારકાઃ ॥

ૐ આપો વા ઇદઁ સર્વં વિશ્વા ભૂતાન્યાપઃ । પ્રાણા
વા આપઃ પશવ
આપોઽન્નમાપોઽમૃતમાપસ્સમ્રાડાપો
વિરાડાપસ્સ્વરાડાપશ્છંદાઁસ્યાપો
જ્યોતીઁષ્યાપો યજૂઁષ્યાપસ્સત્યમાપસ્સર્વા
દેવતા આપો ભૂર્ભુવસ્સુવરાપ ૐ ॥

ૐ ઇમં મે ગઙ્ગે યમુને સરસ્વતિ શુતુદ્રિ સ્તોમઁ
સચતાપરુષ્ણિયા અસિક્નિયા મરુદ્વૃધે
વિતસ્તયાર્જીકીયે શ◌ૃણુહ્યા સુષોમયા ॥

સિતમકરનિષણ્ણાં શુભ્રવર્ણાં ત્રિનેત્રામ્ ।
કરધૃતકલશોદ્યત્સોત્પલાભીત્યભીષ્ટામ્ ॥

વિધિહરિહરરૂપાં સેન્દુકોટીરચૂડામ્ ।
કલિતસિતદુકૂલાં જાહ્નવીં તાં નમામિ ॥

[ગાયત્ર્યા દક્ષિણામૂર્તિમૂલેન ચ દશવારમભિમન્ત્ર્ય -
કલશમુખે પુષ્પાણિ નિક્ષિપ્ય - કલશોદકેન આત્માનં
સર્વોપકરણાનિ ચ પ્રોક્ષયેત્]
॥ શંખપૂજા ॥

[કલશોદકેન ભૂર્ભુવસ્સુવરોઽમિતિ શંખં પ્રક્ષાળ્ય -
ચક્રમુદ્રાં પ્રદર્શ્ય - ગાયત્ર્યા દક્ષિણામૂર્તિમૂલેન ચ શંખં
કલશજલેનાપૂર્ય - ધેનુમુદ્રાં પ્રદર્શ્ય - પરિમલદ્રવ્યાણિ
નિક્ષિપ્ય - ગન્ધાક્ષતપત્રપુષ્પૈઃ સમભ્યર્ચયેત્]
શંખમૂલે બ્રહ્મણે નમઃ ।
શંખમધ્યે જનાર્દનાય નમઃ ।
શંખાગ્રે ચન્દ્રશેખરાય નમઃ ॥

[શંખં સ્પૃષ્ટ્વા]
શંખં ચન્દ્રાર્કદૈવત્યં મધ્યે વરુણસંયુતમ્ ।
પૃષ્ઠે પ્રજાપતિશ્ચૈવ અગ્રે ગઙ્ગા સરસ્વતી ॥

ત્રૈલોક્યે યાનિ તીર્થાનિ વાસુદેવસ્ય ચાજ્ઞયા ।
શંખે તિષ્ઠન્તિ વિપ્રેન્દ્રાઃ તસ્માચ્છંખં પ્રપૂજયેત્ ॥

ત્વં પુરા સાગરોત્પન્નઃ વિષ્ણુના વિધૃતઃ કરે ।
પૂજિતઃ સર્વદેવૈશ્ચ પાઞ્ચજન્ય નમોઽસ્તુતે ॥

ગર્ભા દેવારિનારીણાં વિશીર્યન્તે સહસ્રધા ।
તવ નાદેન પાતાલે પાઞ્ચજન્ય નમોઽસ્તુતે ॥

દર્શનાદેવ શંખસ્ય કિં પુનઃ સ્પર્શનેન તુ ।
વિલયં યાન્તિ પાપાનિ હિમવદ્ભાસ્કરોદયે ॥

નત્વા શંખં કરે સ્પૃષ્ટ્વા મન્ત્રૈરેતસ્તુ વૈષ્ણવૈઃ ।
યઃ સ્નાપયતિ ગોવિન્દં તસ્ય પુણ્યમનન્તકમ્ ॥

શંખમધ્યસ્થિતં તોયં ભ્રામિતં કેશવોપરિ ।
અઙ્ગલગ્નં મનુષ્યાણાં બ્રહ્મહત્યાયુતં દહેત્ ॥

ૐ પાઞ્ચજન્યાય વિદ્મહે પાવમાનાય ધીમહિ તન્નઃ શંખઃ પ્રચોદયાત્ ॥

[ઇતિ શંખગાયત્રીં દશવારં જપિત્વા - શંખોદકેન કિઞ્ચિત્ કલશે નિક્ષિપ્ય - દેવસ્યાર્ઘ્યં દત્વા - શંખોદકેન પૂજાદ્રવ્યાણિ આત્માનં ચ પ્રોક્ષ્ય - શેષં વિસૃજ્ય - પુનઃ શંખમાપૂર્ય - ગન્ધાદિભિરભ્યર્ચ્ય - દેવસ્ય દક્ષિણદિગ્ભાગે સ્થાપયેત્]

॥ શ્રીમહાગણપતિ પૂજા ॥

આદૌ નિર્વિઘ્નતા સિદ્ધ્યર્થં શ્રીમહાગણપતિપૂજાં કરિષ્યે ॥

ૐ ગણાનાં᳚ ત્વા ગ॒ણપતિꣳ હવામહે ક॒વિં
ક॑વી॒નામુ॑પ॒મશ્ર॑વસ્તમમ્ । જ્યે॒ષ્ઠ॒રાજં॒ બ્રહ્મ॑ણાં
બ્રહ્મણસ્પત॒ આનઃ॑ શ◌ૃ॒ણ્વન્નૂ॒તિભિ॑સ્સીદ॒ સાદ॑નમ્ ॥

શ્રીમહાગણપતયે નમઃ - ધ્યાયામિ । ધ્યાનં સમર્પયામિ ॥

શ્રીમહાગણપતયે નમઃ - અવાહયામિ ।
શ્રીમહાગણપતયે નમઃ - આસનં કલ્પયામિ ।
શ્રીમહાગણપતયે નમઃ - પાદારવિન્દયોઃ પાદ્યં પાદ્યં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - હસ્તેષુ અર્ઘ્યમર્ઘ્યં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - મુખારવિન્દે આચમનીયમાચમનીયં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - મલાપકર્ષણસ્નાનં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - ફલપઞ્ચામૃતસ્નાનં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - શુદ્ધોદકસ્નાનં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - સ્નાનાઙ્ગમાચમનીયમાચમનીયં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - વસ્ત્રયુગ્મં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - આચમનીયમાચમનીયં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - યજ્ઞોપવીતં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - આચમનીયમાચમનીયં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - આભરણાનિ સમર્પયામિ ।

શ્રીમહાગણપતયે નમઃ - દિવ્યગન્ધાન્ધારયામિ ।
શ્રીમહાગણપતયે નમઃ - અક્ષતાન્ સમર્પયામિ ।
॥ અથ નામપૂજા ॥

ૐ સુમુખાય નમઃ ।
ૐ એકદન્તાય નમઃ ।
ૐ કપિલાય નમઃ ।
ૐ ગજકર્ણકાય નમઃ ।
ૐ લમ્બોદરાય નમઃ ।
ૐ વિકટાય નમઃ ।
ૐ વિઘ્નરાજાય નમઃ ।
ૐ ગણાધિપાય નમઃ ।
ૐ ધૂમ્રકેતવે નમઃ ।
ૐ ગણાધ્યક્ષાય નમઃ ।
ૐ ભાલચન્દ્રાય નમઃ ।
ૐ ગજાનનાય નમઃ ।
શ્રીમહાગણપતયે નમઃ - નાનાવિધ પરિમલપત્રપુષ્પાણિ
સમર્પયામિ ॥

શ્રીમહાગણપતયે નમઃ - ધૂપમાઘ્રાપયામિ ।
શ્રીમહાગણપતયે નમઃ - દીપં દર્શયામિ ।
શ્રીમહાગણપતયે નમઃ - ધૂપદીપાનન્તરં
આચમનીયમાચમનીયં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - અમૃતનૈવેદ્યં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - તામ્બૂલં સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - દિવ્યમઙ્ગલનીરાજનં દર્શયામિ ।
ૐ નમો વ્રાતપતયે નમો ગણપતયે નમઃ પ્રમથપતયે નમસ્તેઽસ્તુ
લમ્બોદરાયૈકદન્તાય વિઘ્નવિનાશિને શિવસુતાય શ્રીવરદમૂર્તયે
નમો નમઃ ॥

શ્રીમહાગણપતયે નમઃ - મન્ત્રપુષ્પં સમર્પયામિ ॥

શ્રીમહાગણપતયે નમઃ - પ્રદક્ષિણનમસ્કારાન્ સમર્પયામિ ।
શ્રીમહાગણપતયે નમઃ - પ્રસન્નાર્ઘ્યં સમર્પયામિ ।

વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
નિર્વિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

શ્રીમહાગણપતયે નમઃ - પ્રાર્થયામિ ।
શ્રીમહાગણપતયે નમઃ - સમસ્તોપચારપૂજાઃ સમર્પયામિ ।
અનયા પૂજયા શ્રીમહાગણપતિઃ પ્રીયતામ્ ॥

॥ આત્મપૂજા ॥

આત્મને નમઃ - દિવ્યગન્ધાન્ ધારયામિ ॥

આત્મને નમઃ ।
અન્તરાત્મને નમઃ ।
જીવાત્મને નમઃ ।
યોગાત્મને નમઃ ।
પરમાત્મને નમઃ ।
જ્ઞાનાત્મને નમઃ - સમસ્તોપચારાન્ સમર્પયામિ ॥

દેહો દેવાલયઃ પ્રોક્તઃ જીવો દેવઃ સનાતનઃ ।
ત્યજેદજ્ઞાનનિર્માલ્યં સોઽહં ભાવેન પૂજયેત્ ॥

આરાધયામિ મણિસન્નિભમાત્મલિઙ્ગં
માયાપુરીહૃદયપઙ્કજસન્નિવિષ્ટમ્ ।
શ્રદ્ધાનદીવિમલચિત્તજલાભિષેકૈઃ નિત્યં
સમાધિકુસુમૈરપુનર્ભવાય ॥

॥ મણ્ટપધ્યાનમ્ ॥

ઉત્તમોજ્જ્વલકાઞ્ચનેન રચિતં તુઙ્ગાઙ્ગરઙ્ગસ્થલમ્ ।
શુદ્ધસ્ફાટિકભિત્તિકાવિરચિતૈઃ સ્તમ્ભૈશ્ચ હેમૈશ્શુભૈઃ ॥

દ્વારૈશ્ચામરરત્નરાજખચિતૈઃ વજ્રૈશ્ચ સોપાનકૈઃ ।
નાનારત્નવિચિત્રસ્વર્ણકલશૈઃ ધ્યાયેન્મહામણ્ટપમ્ ॥

॥ દ્વારદેવતા પૂજા ॥

ૐ પૂર્વદ્વારે દ્વારશ્રિયૈ નમઃ - ૐ ધાત્રે નમઃ । ૐ વિધાત્રે
નમઃ ॥

ૐ દક્ષિણદ્વારે દ્વારશ્રિયૈ નમઃ - ૐ જયાય નમઃ । ૐ વિજયાય

નમઃ ॥

ૐ પશ્ચિમદ્વારે દ્વારશ્રિયૈ નમઃ - ૐ ચણ્ડાય નમઃ । ૐ
પ્રચણ્ડાય નમઃ ॥

ૐ ઉત્તરદ્વારે દ્વારશ્રિયૈ નમઃ - ૐ નન્દાય નમઃ । ૐ સુનન્દાય
નમઃ ॥

ૐ ઊર્ધ્વદ્વારે દ્વારશ્રિયૈ નમઃ - ૐ આકાશાય નમઃ । ૐ
અન્તરિક્ષાય નમઃ ॥

ૐ અધોદ્વારે દ્વારશ્રિયૈ નમઃ - ૐ ભૂમ્યૈ નમઃ । ૐ પાતાલાય
નમઃ ॥

ૐ પૂર્વે ધર્માય નમઃ ।
ૐ દક્ષિણે જ્ઞાનાય નમઃ ।
ૐ પશ્ચિમે વૈરાગ્યાય નમઃ ।
ૐ ઉત્તરે ઐશ્વર્યાય નમઃ ॥

॥ અષ્ટદિક્પાલ પૂજા ॥

ૐ ઇન્દ્રાય નમઃ ।
ૐ અગ્નયે નમઃ ।
ૐ યમાય નમઃ ।
ૐ નિરૃતયે નમઃ ।
ૐ વરુણાય નમઃ ।
ૐ વાયવે નમઃ ।
ૐ કુબેરાય નમઃ ।
ૐ ઈશાનાય નમઃ ॥

॥ પીઠપૂજા ॥

ૐ આધારશક્ત્યૈ નમઃ ।
ૐ મૂલપ્રકૃત્યૈ નમઃ ।
ૐ આદિકૂર્માય નમઃ ।
ૐ વરાહાય નમઃ ।
ૐ અનન્તાય નમઃ ।
ૐ અષ્ટદિગ્ગજેભ્યો નમઃ ।

ॐ ક્ષીરાર્ણવાય નમઃ ।
ॐ શ્વેતદ્વીપાય નમઃ ।
ॐ કલ્પવૃક્ષાય નમઃ ।
ॐ સુવર્ણમણ્ટપાય નમઃ ।
ॐ સં સત્વાય નમઃ ।
ॐ રં રજસે નમઃ ।
ॐ તં તમસે નમઃ ।
ॐ વહ્નિમણ્ડલાય નમઃ ।
ॐ સૂર્યમણ્ડલાય નમઃ ।
ॐ સોમમણ્ડલાય નમઃ ।
ॐ હ્રીં જ્ઞાનાત્મને નમઃ ।
ॐ ચતુર્દશલોકેભ્યો નમઃ ।
ॐ સપ્તસાગરેભ્યો નમઃ ।
ॐ અઙ્કુરાય નમઃ ।
ॐ નાળાય નમઃ ।
ॐ પત્રેભ્યો નમઃ ।
ॐ કેસરેભ્યો નમઃ ।
ॐ દલેભ્યો નમઃ ॥

ધ્યાનમ્

કૈલાસાચલમધ્યસ્થં કામિતાભીષ્ટદાયકમ્ ।
બ્રહ્માદિપ્રાર્થનાપ્રાપ્ત દિવ્યમાનુષવિગ્રહમ્ ॥

ભક્તાનુગ્રહણૈકાન્ત શાન્ત સ્વાન્ત સમુજ્જ્વલમ્ ।
સર્વજ્ઞં સંયમીન્દ્રાણાં સાર્વભૌમં જગદ્ગુરુમ્ ॥

કિઙ્કુરીભૂતભક્તૈનઃ પઙ્કુજાતવિશોષણમ્ ।
ધ્યાયામિ શઙ્કુરાચાર્યં સર્વલોકૈકશઙ્કુરમ્ ॥

ચિન્મુદ્રાં દક્ષહસ્તે પ્રણતજનમહાબોધદાત્રીં દધાનમ્ ।
વામે નમ્રેષ્ટદાન પ્રકટનચતુરં ચિહ્નમપ્યાદધાનમ્ ॥

કારુણ્યાપારવાર્ધિં યતિવરવપુષં શઙ્કુરં શઙ્કુરાંશમ્ ।
ચન્દ્રાહઙ્કારહઙ્કૃત્ સ્મિતલસિતમુખં ભાવયામ્યન્તરઙ્ગે ॥

અસ્મિન્ બિંબમધ્યે શ્રીશઙ્કુરભગવત્પાદાચાર્યસ્વામિનં ધ્યાયામિ

॥

આવાહનમ્

ૐ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં વિશ્વતો વૃત્વા અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥

સદ્ગુરો શઙ્કરાચાર્ય રૂપાન્તરિતવિગ્રહ ।
સાક્ષાચ્છ્રીદક્ષિણામૂર્તે કૃપયાઽઽવાહિતો ભવ ॥

અસ્મિન્ બિંબમધ્યે શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિનં
આવાહયામિ ॥

આસનમ્

ૐ પુરુષ એવેદꣳ સર્વં યદ્ભૂતં યચ્ચ ભવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥

આર્યામ્બા ગર્ભસમ્ભૂત માતૃવાત્સલ્યભાજન ।
જગદ્ગુરુદદામ્યેતદ્રત્નસિંહાસનં શુભમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - રત્નસિંહાસનં
સમર્પયામિ ॥

પાદ્યમ્

ૐ એતાવાનસ્ય મહિમા અતો જ્યાયાꣳશ્ચ પૂરુષઃ ।
પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ
॥

વિદ્યધિરાજસત્પૌત્ર વિદ્યાવ્યાસઙ્ગતત્પર ।
વિશ્વવિખ્યાત વૈદુષ્ય પાદ્યમેતદ્દદામ્યહમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - પાદારવિન્દયોઃ
પાદ્યં પાદ્યં સમર્પયામિ ॥

અર્ઘ્યમ્

ૐ ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ
પાદોઽસ્યેહાભવાત્પુનઃ ।
તતો વિશ્વં વ્યક્રામત્ સાશનાનશને અભિ ॥

શિવગુર્વન્વયામ્બોધિ શરત્પર્વનિશાકર ।
શિવાવતાર ભગવન્ ગૃહાણાર્ઘ્યં નમોઽસ્તુતે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - હસ્તયોઃ
અર્ઘ્યમર્ઘ્યં સમર્પયામિ ॥

આચમનમ્

તસ્માદ્વિરાડજાયત વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ભૂમિમથો પુરઃ ॥

દરિદ્રબ્રાહ્મણીસદ્મ સ્વર્ણામલકવર્ષક ।
વિસ્માપકસ્વાત્મવૃત્ત દદામ્યાચમનીયકમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - મુખારવિન્દે
આચમનીયમાચમનીયં સમર્પયામિ ॥

॥ મધુપર્કમ્ ॥

ૐ મધુવાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ।
મધુમક્તમુતોષસિ મધુમત્પાર્થિવ ँ રજઃ ।
મધુ દ્યૌરસ્તુ નઃ પિતા ।
મધુમાન્નો વનસ્પતિર્મધુમા ँ અસ્તુ સૂર્યઃ ।
માધ્વીર્ગાવો ભવન્તુ નઃ ॥

જનનીસમનુજ્ઞાત સન્યાસાશ્રમસઙ્ગ્રહ ।
ગન્ધર્વશાપશમન મધુપર્કં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - મધુપર્કં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
આચમનીયમાચમનીયં સમર્પયામિ ॥

॥ સ્નાનમ્ ॥

ૐ યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તો અસ્યાસીદાજ્યં ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ ॥

ૐ આપો હિ ષ્ઠા મયોભુવસ્તાન ઊર્જે દધાતન ।
મહેરણાય ચક્ષસે । યો વઃ શિવતમો રસસ્તસ્ય
ભાજયતેહ નઃ । ઉશતીરિવ માતરઃ । તસ્મા અરઙ્ગ
મામવો યસ્ય ક્ષયાય જિન્વથ । આપો જનયથા ચ નઃ
॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
મલાપકર્ષણસ્નાનં સમર્પયામિ ॥

ૐ આપ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ વૃષ્ણિયમ્ ।
ભવા વાજસ્ય સંગથે ॥

ૐ સદ્યોજાતં પ્રપદ્યામિ સદ્યોજાતાય વૈ નમો નમઃ
। ભવે ભવે નાતિ ભવે ભવસ્વ માં ભવોદ્ભવાય
નમઃ ॥

કામધેનોસ્સમુદ્ભૂતં દેવર્ષિપિતૃતૃપ્તિદમ્ ।
પયો દદામિ દેવેશ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ક્ષીરસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ દધિક્રાવ્ણો અકારિષં જિષ્ણોરશ્વસ્ય વાજિનઃ ।
સુરભિનો મુખા કરત્પ્રણ અયૂँષિ તારિષત્ ॥

ૐ વામદેવાય નમો જ્યેષ્ઠાય નમઃ શ્રેષ્ઠાય
નમો રુદ્રાય નમઃ કાલાય નમઃ કલવિકરણાય
નમો બલવિકરણાય નમો બલાય નમો બલપ્રમથનાય
નમસ્સર્વભૂતદમનાય નમો મનોન્મનાય નમઃ ॥

ચન્દ્રમણ્ડલસઙ્કાશં સર્વદેવપ્રિયં દધિ ।
સ્નાનાર્થં તે મયા દત્તં પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - દધિસ્નાનં

સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ શુક્રમસિ જ્યોતિરસિ તેજોઽસિ દેવો
વસ્સવિતોત્પુનાત્વચ્છિદ્રેણ પવિત્રેણ વસોસ્સૂર્યસ્ય
રશ્મિભિઃ ॥

ૐ અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ ।
સર્વેભ્યસ્સર્વશર્વેભ્યો નમસ્તે અસ્તુ રુદ્રરૂપેભ્યઃ ॥

આજ્યં સુરાણામાહારઃ આજ્યં યજ્ઞે પ્રતિષ્ઠિતમ્ ।
આજ્યં પવિત્રં પરમં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - આજ્યસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ મધુવાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ।
મધુમક્તમુતોષસિ મધુમત્પાર્થિવꣳ રજઃ ।
મધુ દ્યૌરસ્તુ નઃ પિતા ।
મધુમાન્નો વનસ્પતિર્મધુમાꣳ અસ્તુ સૂર્યઃ ।
માધ્વીર્ગાવો ભવન્તુ નઃ ॥

ૐ તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ તન્નો રુદ્રઃ
પ્રચોદયાત્ ॥

સર્વૌષધિસમુત્પન્નં પીયૂષસદૃશં મધુ ।
સ્નાનાર્થં તે પ્રયચ્છામિ ગૃહાણ પરમેશ્વર ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - મધુસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં

સમર્પયામિ ॥

ૐ સ્વાદુઃ પવસ્વ દિવ્યાય જન્મને સ્વાદુરિન્દ્રાય
સુહવીતુ નામ્ને ।
સ્વાદુર્મિત્રાય વરુણાય વાયવે બૃહસ્પતયે
મધુમાँ અદાભ્યઃ ॥

ૐ ઈશાનસ્સર્વવિદ્યાનામીશ્વરસ્સર્વભૂતાનાં
બ્રહ્માઽધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મે અસ્તુ
સદાશિવોમ્ ॥

ઇક્ષુદણ્ડસમુદ્ભૂત દિવ્યશર્કરયા ગુરુમ્ ।
સ્નપયામિ સદા ભક્ત્યા પ્રીતો ભવ મહેશ્વર ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શર્કરાસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ
પુષ્પિણીઃ ।
બૃહસ્પતિ પ્રસૂતાસ્તાનો મુંચંત્વँ હસઃ ॥

ફલેન ફલિતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
તસ્માદસ્યાભિષેકેણ સફલાસ્યુર્મનોરથાઃ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - નારિકેળ
ફલોદકસ્નાનં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ગોવિન્દભગવત્પાદ પાદસેવાદુરન્ધર ।
મહાવાક્યોપદેશાઢ્ય સ્નાહિ પઞ્ચામૃતદ્રવૈઃ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
ફલપઞ્ચામૃતસ્નાનં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

ૐ ઓષધયઃ સંવદન્તે સોમેન સહરાજ્ઞા । યસ્મૈ કરોતિ બ્રાહ્મણસ્તꣳ રાજન્ પારયામસિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ઓષધિસ્નાનં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

ૐ ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં
કરીષિણીમ્ ।
ઈશ્વરીꣳ સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ગન્ધોદકસ્નાનં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

ૐ આયનેતે પરાયણે દૂર્વા રોહન્તુ પુષ્પિણીઃ ।
હ્રદાશ્ચ પુણ્ડરીકાણિ સમુદ્રસ્ય ગૃહા ઇમે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - પુષ્પોદકસ્નાનં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

ૐ ઉપાસ્મૈ ગાયતા નરઃ પવમાનાયેન્દવે ।
અભિદેવાꣳ ઇયક્ષતે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - અક્ષતોદકસ્નાનં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

ૐ તથ્સુવર્ણꣳ હિરણ્યમભવત્ । તથ્સુવર્ણસ્ય
હિરણ્યસ્ય જન્મ । ય એવꣳ સુવર્ણસ્ય હિરણ્યસ્ય
જન્મ વેદ । સુવર્ણ આત્મના ભવતિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - સુવર્ણોદકસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય
માઽમૃતાત્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - રુદ્રાક્ષોદકસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ મા નસ્તોકે તનયે માન આયુષિ મા નો ગોષુ મા
નો અશ્વેષુ રીરિષઃ । વીરાન્માનો રુદ્ર ભામિતો
વધીર્હવિષ્મન્તો નમસા વિધેમ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ભસ્મસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ નમો બિલ્મિને ચ કવચિને ચ નમઃ શ્રુતાય ચ
શ્રુતસેનાય ચ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - બિલ્વોદકસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ કાણ્ડાત્કાણ્ડાત્પ્રરોહન્તી પરુષઃ પરુષઃ પરિ ।
એવા નો દૂર્વે પ્રતનુ સહસ્રેણ શતેન ચ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - દૂર્વોદકસ્નાનં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

ૐ આપો હિ ષ્ઠા મયોભુવસ્તાન ઊર્જે દધાતન ।
મહેરણાય ચક્ષસે । યો વઃ શિવતમો રસસ્તસ્ય
ભાજયતેહ નઃ । ઉશતીરિવ માતરઃ । તસ્મા અરઙ્ગ
મામવો યસ્ય ક્ષયાય જિન્વથ । આપો જનયથા ચ નઃ
॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - શુદ્ધોદકસ્નાનં
સમર્પયામિ ॥

॥ અભિષેકઃ ॥

વારાણસીપુરી રમ્યગઙ્ગાતીરનિષેવક ।
ગઙ્ગાદિતીર્થૈઃ શ્રીરુદ્રમન્ત્રૈસ્ત્વાં સ્નપયામ્યહમ્ ॥

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું
યજ્ઞપતયે । દૈવીસ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ ।
ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો અસ્તુ દ્વિપદે । શં
ચતુષ્પદે । ૐ શાન્તિશ્શાન્તિશ્શાન્તિઃ ॥

ૐ સહસ્રશીર્ષા પુરુષઃ । સહસ્રાક્ષઃ
સહસ્રપાત્ । સ ભૂમિં વિશ્વતો વૃત્વા ।
અત્યતિષ્ટદ્દશાઙ્ગુલમ્ । પુરુષ એવેદꣳ સર્વમ્ ।
યદ્ભૂતં યચ્ચ ભવ્યમ્ । ઉતામૃતત્વસ્યેષાનઃ ।
યદન્નેનાતિરોહતિ । એતાવાનસ્ય મહિમા । અતો
જ્યાયાꣳશ્ચ પૂરુષઃ । પાદોઽસ્ય વિશ્વા ભૂતાનિ
। ત્રિપાદસ્યામૃતં દિવિ । ત્રિપાદૂર્ધ્વ

ઉદૈત્પુરુષઃ । પાદોઽસ્યેહાઽઽભવાત્પુનઃ । તતો
વિશ્વઙ્વ્યક્રામત્ । સાશનાનશને અભિ ।
તસ્માદ્વિરાડજાયત । વિરાજો અધિ પૂરુષઃ । સ જાતો
અત્યરિચ્યત । પશ્ચાદ્ભૂમિમથો પુરઃ । યત્પુરુષેણ
હવિષા । દેવા યજ્ઞમતન્વત । વસન્તો
અસ્યાસીદાજ્યમ્। ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ ।
સપ્તાસ્યાસન્ પરિધયઃ । ત્રિસ્સપ્ત સમિધઃ કૃતાઃ ।
દેવા યદ્યજ્ઞં તન્વાનાઃ । અબધ્નન્ પુરુષં પશુમ્ ।
તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્। પુરુષં
જાતમગ્રતઃ । તેન દેવા અયજન્ત । સાધ્યા
ઋષયશ્ચ યે । તસ્માદ્યજ્ઞાત્સર્વ હુતઃ ।
સંભૃતં પૃષદાજ્યમ્ । પશૂꣳ સ્તાꣳ શ્ચક્રે
વાયવ્યાન્ । આરણ્યાન્ ગ્રામ્યાશ્ચ યે ।
તસ્માદ્યજ્ઞાત્સર્વહુતઃ । ઋચસ્સામાનિ જજ્ઞિરે ।
છન્દાꣳસિ જજ્ઞિરે તસ્માત્ । યજુસ્તસ્માદજાયત ।
તસ્માદશ્વા અજાયન્ત । યે કે ચોભયાદતઃ । ગાવો હ
જજ્ઞિરે તસ્માત્ । તસ્માજ્જાતા અજાવયઃ ।
યત્પુરુષં વ્યદધુઃ । કતિધા વ્યકલ્પયન્ । મુખં
કિમસ્ય કૌ બાહૂ । કાવૂરૂ પાદાવુચ્યેતે ।
બ્રાહ્મણોઽસ્ય મુખમાસીત્ । બાહૂ રાજન્યઃ કૃતઃ
। ઊરૂ તદસ્ય યદ્વૈશ્યઃ । પદ્ભ્યાꣳ શૂદ્રો અજાયત
। ચન્દ્રમા મનસો જાતઃ । ચક્ષોસ્સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ । પ્રાણાદ્વાયુરજાયત ।
નાભ્યા આસીદન્તરિક્ષમ્ । શીર્ષ્ણો દ્યૌસ્સમવર્તત ।
પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ । તથા લોકાꣳ
અકલ્પયન્ । વેદાહમેતં પુરુષં મહાન્તમ્ ।
આદિત્યવર્ણં તમસસ્તુ પારે। સર્વાણિ રૂપાણિ

વિચિત્ય ધીરઃ । નામાનિ કૃત્વાઽભિવદન્ યદાસ્તે।
ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્
પ્રદિશશ્ચતસ્રઃ । તમેવં વિદ્વાનમૃત ઇહ
ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે । યજ્ઞેન
યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનસ્સચન્તે । યત્ર પૂર્વે
સાધ્યાસ્સન્તિ દેવાઃ ।
અદ્ભ્યઃ સંભૂતઃ પૃથિવ્યૈ રસાચ્ચ ।
વિશ્વકર્મણસ્સમવર્તતાધિ । તસ્ય ત્વષ્ટા
વિદધદ્રૂપમેતિ । તત્પુરુષસ્ય વિશ્વમાજાનમગ્રે
। વેદાહમેતં પુરુષં મહાન્તમ્। આદિત્યવર્ણં
તમસઃ પરસ્તાત્। તમેવં વિદ્વાનમૃત ઇહ ભવતિ ।
નાન્યઃ પન્થા વિદ્યતેયઽનાય । પ્રજાપતિશ્ચરતિ
ગર્ભે અન્તઃ । અજાયમનો બહુધા વિજાયતે। તસ્ય
ધીરાઃ પરિજાનન્તિ યોનિમ્। મરીચીનાં પદમિચ્છન્તિ
વેધસઃ॥ યો દેવેભ્ય આતપતિ । યો દેવાનાં
પુરોહિતઃ। પૂર્વો યો દેવેભ્યો જાતઃ । નમો રુચાય
બ્રાહ્મયે। રુચં બ્રાહ્મમ્ જનયન્તઃ । દેવા અગ્રે
તદબ્રુવન્। યસ્ત્વૈવં બ્રાહ્મણો વિદ્યાત્ । તસ્ય દેવા
અસન્ વશે। હ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યૌ।
અહોરાત્રે પાર્શ્વે। નક્ષત્રાણિ રૂપમ્ । અશ્વિનૌ
વ્યાત્તમ્। ઇષ્ટમ્ મનિષાણ । અમું મનિષાણ। સર્વમ્
મનિષણ ॥

તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય। ગાતું
યજ્ઞપતયે । દૈવીસ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ ।
ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો અસ્તુ દ્વિપદે। શં
ચતુષ્પદે । ૐ શાન્તિશ્શાન્તિશ્શાન્તિઃ ॥

ૐ નમઃ સોમાય ચ રુદ્રાય ચ નમસ્તામ્રાય
ચારુણાય ચ નમઃ શઙ્ગાય ચ પશુપતયે ચ
નમ ઉગ્રાય ચ ભીમાય ચ નમો અગ્રેવધાય ચ
દૂરેવધાય ચ નમો હન્ત્રે ચ હનીયસે ચ નમો
વૃક્ષેભ્યો હરિકેશેભ્યો નમસ્તારાય
નમશ્શંભવે ચ મયોભવે ચ નમઃ શંકરાય ચ
મયસ્કરાય ચ નમઃ શિવાય ચ શિવતરાય ચ
નમસ્તીર્થ્યાય ચ કૂલ્યાય ચ નમઃ પાર્યાય
ચાવાર્યાય ચ નમઃ પ્રતરણાય ચોત્તરણાય ચ
નમ આતાર્યાય ચાલાદ્યાય ચ નમઃ શષ્પ્યાય
ચ ફેન્યાય ચ નમઃ સિકત્યાય ચ પ્રવાહ્યાય ચ ॥
ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય
માઽમૃતાત્ ॥
ૐ યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો રુદ્રો વિશ્વા
ભુવનાઽઽવિવેશ તસ્મૈ રુદ્રાય નમો અસ્તુ ॥
યે તે સહસ્રમયુતં પાશા મૃત્યો મર્ત્યાય હન્તવે
। તાન્ યજ્ઞસ્ય માયયા સર્વાનવ યજામહે । મૃત્યવે
સ્વાહા મૃત્યવે સ્વાહા ॥ ૐ નમો ભગવતે રુદ્રાય વિષ્ણવે
મૃત્યુર્મે પાહિ । પ્રાણાનાં ગ્રન્થિરસિ રુદ્રો મા વિશાન્તકઃ
। તેનાન્નેનાપ્યાયસ્વ ॥ ૬॥ નમો રુદ્રાય વિષ્ણવે મૃત્યુર્મે
પાહિ । સદાશિવોમ્ ॥
ૐ શં ચ મે મયશ્ચ મે પ્રિયં ચ મેઽનુકામશ્ચ મે
કામશ્ચ મે સૌમનસશ્ચ મે ભદ્રં ચ મે શ્રેયશ્ચ
મે વસ્યશ્ચ મે યશશ્ચ મે ભગશ્ચ મે દ્રવિણં ચ
મે યન્તા ચ મે ધર્તા ચ મે ક્ષેમશ્ચ મે ધૃતિશ્ચ
મે વિશ્વં ચ મે મહશ્ચ મે સંવિચ્ચ મે જ્ઞાત્રં ચ

મે સૂશ્ચ મે પ્રસૂશ્ચ મે સીરં ચ મે લયશ્ચ મ

ઋતં ચ મેઽમૃતં ચ મેઽયક્ષ્મં ચ મેઽનામયચ્ચ

મે જીવાતુશ્ચ મે દીર્ઘાયુત્વં ચ મેઽનમિત્રં ચ

મેઽભયં ચ મે સુગં ચ મે શયનં ચ મે સૂષા ચ

મે સુદિનં ચ મે ॥

ૐ ઇડા દેવહૂર્મનુર્યજ્ઞનીર્બૃહસ્પતિરુક્થામદાનિ

શઁ સિષદ્વિશ્વેદેવાઃ સૂક્તવાચઃ

પૃથિવીમાતર્મા મા હિઁ સીર્મધુ મનિષ્યે મધુ

જનિષ્યે મધુ વક્ષ્યામિ મધુ વદિષ્યામિ મધુમતીં

દેવેભ્યો વાચમુદ્યાસઁ શુશ્રૂષેણ્યાં

મનુષ્યેભ્યસ્તં મા દેવા અવન્તુ શોભાયૈ

પિતરોઽનુમદન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ હિરણ્યવર્ણાં હરિણીં સુવર્ણરજતસ્રજામ્ ।

ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ ૧॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ ।

યસ્યાં હિરણ્યં વિન્દેયં ગામશ્વં પુરુષાનહમ્ ॥ ૨ ॥

અશ્વપૂર્વાં રથમધ્યાં હસ્તિનાદપ્રબોધિનીમ્ ।

શ્રિયં દેવીમુપહ્વયે શ્રીર્મા દેવી જુષતામ્ ॥ ૩ ॥

કાં સોસ્મિતાં હિરણ્યપ્રાકારામાર્દ્રાં જ્વલન્તીં

તૃપ્તાં તર્પયન્તીમ્ । પદ્મેસ્થિતાં પદ્મવર્ણાં

તામિહોપહ્વયે શ્રિયમ્ ॥ ૪ ॥

ચન્દ્રાં પ્રભાસાં યશસા જ્વલન્તીં શ્રિયં લોકે

દેવજુષ્ટામુદારામ્ । તાં પદ્મિનીમીં શરણમહં

પ્રપદ્યેઽલક્ષ્મીર્મે નશ્યતાં ત્વાં વૃણે ॥ ૫ ॥

આદિત્યવર્ણે તપસોઽધિજાતો વનસ્પતિસ્તવ

વૃક્ષોઽથ બિલ્વઃ । તસ્ય ફલાનિ તપસાનુદન્તુ

માયાન્તરાયાશ્ચ બાહ્યા અલક્ષ્મીઃ ॥ ૬ ॥

ઉપૈતુ માં દેવસખઃ કીર્તિશ્ચ મણિના સહ ।

પ્રાદુર્ભૂતોઽસ્મિ રાષ્ટ્રેઽસ્મિન્ કીર્તિમૃદ્ધિં

દદાતુ મે ॥ ૭ ॥

ક્ષુત્પિપાસામલાં જ્યેષ્ઠામલક્ષ્મીં નાશયામ્યહમ્ ।

અભૂતિમસમૃદ્ધિં ચ સર્વાં નિર્ણુદમે ગૃહાત્ ॥

૮ ॥

ગંધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં

કરીષિણીમ્ । ઈશ્વરીં સર્વભૂતાનાં

તામિહોપહ્વયે શ્રિયમ્ ॥ ૯ ॥

મનસઃ કામમાકૂતિં વાચઃ સત્યમશીમહિ ।

પશૂનાં રૂપમન્નસ્ય મયિ શ્રીઃ શ્રયતાં યશઃ

॥ ૧૦ ॥

કર્દમેન પ્રજાભૂતામયિ સમ્ભવ કર્દમ । શ્રિયં

વાસય મે કુલે માતરં પદ્મમાલિનીમ્ ॥ ૧૧ ॥

આપઃ સૃજન્તુ સ્નિગ્ધાનિ ચિક્લીત વસમે ગૃહે । નિ

ચ દેવીં માતરં શ્રિયં વાસય મે કુલે ॥ ૧૨ ॥

આર્દ્રાં પુષ્કરિણીં પુષ્ટિં સુવર્ણાં હેમમાલિનીમ્ ।

સૂર્યાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ ૧૩ ॥

આર્દ્રાં યઃ કરિણીં યષ્ટિં પિઙ્ગલાં પદ્મમાલિનીમ્

। ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ ૧૪

॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ ।

યસ્યાં હિરણ્યં પ્રભૂતં ગાવોદાસ્યોઽશ્વાન્

વિન્દેયં પુરુષાનહમ્ ॥ ૧૫ ॥

મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ન્યૈ ચ ધીમહિ તન્નો

લક્ષ્મીઃ પ્રચોદયાત્ ॥

ૐ જાતવેદસે સુનવામ સોમમરાતીયતો નિદહાતિ વેદઃ
।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા નાવેવ સિન્ધું
દુરિતાત્યગ્નિઃ ॥ ૧॥

તામગ્નિવર્ણાં તપસા જ્વલન્તીં વૈરોચનીં
કર્મફલેષુ જુષ્ટામ્ ।
દુર્ગાં દેવીꣳ શરણમહં પ્રપદ્યે સુતરસિતરસે
નમઃ ॥ ૨॥

અગ્ને ત્વં પારયાનવ્યો અસ્માન્ સ્વસ્તિભિરતિ દુર્ગાણિ
વિશ્વા ।
પૂશ્ચ પૃથ્વી બહુલા ન ઉર્વી ભવા તોકાય
તનયાય શં યોઃ ॥ ૩॥

વિશ્વાનિ નો દુર્ગહા જાતવેદસ્સિન્ધુન્નનાવા
દુરિતાઽતિપર્ષિ ।
અગ્ને અત્રિવન્મનસા ગૃણાનોઽસ્માકં બોધ્યવિતા
તનૂનામ્ ॥ ૪॥

પૃતનાજિતꣳ સહમાનમુગ્રમગ્નિꣳ હુવેમ
પરમાથ્સધસ્થાત્ ।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા ક્ષામદ્દેવો અતિ
દુરિતાત્યગ્નિઃ ॥ ૫॥

પ્રત્નોષિકમીડ્યો અધ્વરેષુ સનાચ્ચ હોતા
નવ્યશ્ચ સત્સિ ।
સ્વાગ્ચાગ્ને તનુવં પિપ્રયસ્વાસ્મભ્યં ચ
સૌભગમાયજસ્વ ॥ ૬॥

ગોભિર્જુષ્ટમયુજો નિષિક્તં તવેન્દ્ર
વિષ્ણોરનુસઞ્ચરેમ ।

નાકસ્ય પૃષ્ઠમભિસંવસાનો વૈષ્ણવીં લોક
ઇહમાદયન્તામ્ ॥ ૭॥

કાત્યાયનાય વિદ્મહે કન્યકુમારિ ધીમહિ તન્નો
દુર્ગિઃ પ્રચોદયાત્ ॥

ૐ ભૂર્ભુવસ્સ્વઃ । અમૃતાભિષેકોઽસ્તુ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
સ્નાનાઙ્ગમાચમનીયમાચમનીયં સમર્પયામિ ॥

વસ્ત્રયુગ્મમ્
ૐ સપ્તાસ્યાસન્ પરિધયઃ । ત્રિસ્સપ્ત સમિધઃ કૃતાઃ
। દેવા યદ્યજ્ઞં તન્વાનાઃ । અબધ્નન્ પુરુષં પશુમ્
।

ભાષ્યભાગીરથીપાથઃ પવિત્રીકૃતભૂતલ ।
ભાષ્યપ્રવચનાસક્ત વસ્ત્રયુગ્મં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - વસ્ત્રયુગ્મં
સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
આચમનીયમાચમનીયં સમર્પયામિ ॥

શ્રીગન્ધમ્
ૐ તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્ । પુરુષં
જાતમગ્રતઃ । તેન દેવા અયજન્ત । સાધ્યા
ઋષયશ્ચ યે । તસ્માદ્યજ્ઞાત્સર્વ હુતઃ ।
સંભૃતં પૃષદાજ્યમ્ । પશૂꣳસ્તાꣳશ્ચક્રે
વાયવ્યાન્ । આરણ્યાન્ ગ્રામ્યાશ્ચ યે ।
ગંધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં
કરીષિણીમ્ । ઈશ્વરીં સર્વભૂતાનાં
તામિહોપહ્વયે શ્રિયમ્ ॥

સનન્દનાદિ મેધાવિપણ્ડિતચ્છાત્ર સંવૃત ।

સર્વશાસ્ત્રાર્થનિપુણ ગન્ધાન્ ધારય સાદરમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
દિવ્યગન્ધાન્ધારયામિ ॥

અક્ષતમ્
ૐ તસ્માદ્યજ્ઞાત્સર્વહુતઃ । ઋચસ્સામાનિ જજ્ઞિરે ।
છન્દાꣳસિ જજ્ઞિરે તસ્માત્ । યજુસ્તસ્માદજાયત ।
આયનેતે પરાયણે દૂર્વા રોહન્તુ પુષ્પિણીઃ ।
હ્રદાશ્ચ પુણ્ડરીકાણિ સમુદ્રસ્ય ગૃહા ઇમે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ગન્ધસ્યોઽપરિ
અલઙ્કરણાર્થે અક્ષતાન્ સમર્પયામિ ॥

ભસ્મોદ્ધૂલનમ્
ૐ મા નસ્તોકે તનયે માન આયુષિ મા નો ગોષુ મા
નો અશ્વેષુ રીરિષઃ । વીરાન્માનો રુદ્ર ભામિતો
વધીર્હવિષ્મન્તો નમસા વિધેમ તે ॥

વૃદ્ધવેષપ્રતિચ્છન્ન વ્યાસસન્દર્શનોત્સુક ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગ ભસ્મ દિવ્યં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ભસ્મોદ્ધૂલનં
સમર્પયામિ ॥

કુઙ્કુમચૂર્ણમ્
વ્યાસદત્ત વરપ્રાપ્ત ષોડશાબ્દાયુરુજ્જ્વલ ।
કિઙ્કરીભૂતભૂપાલ કુઙ્કુમં તે દદામ્યહમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - કુઙ્કુમચૂર્ણં
સમર્પયામિ ॥

રુદ્રાક્ષમાલિકા
શ્રીમન્મણ્ડનમિશ્રાદિ વાદકેળિવિશારદ ।
દુર્વાદતૂલવાતૂલ ભજ રુદ્રાક્ષમાલિકામ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - રુદ્રાક્ષમાલિકાં
સમર્પયામિ ॥

ॐ નમો॑ બિ॒લ્મિને॑ ચ કવ॒ચિને॑ ચ॒ નમઃ॑ શ્રુ॒તાય॑ ચ
શ્રુતસે॒નાય॑ ચ ॥

શ્રીમન્મણ્ડનકર્ણોક્ત મહાવાક્યાદિમન્ત્રક ।
સુરેશ્વરાખ્યા સન્દાયિન્ બિલ્વપત્રં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - બિલ્વપત્રં
સમર્પયામિ ॥

પુષ્પમાલિકા
ॐ તસ્મા॒દશ્વા॑ અજાયન્ત । યે કે ચો॑ભ॒યાદ॑તઃ । ગાવો॑ હ
જજ્ઞિ॒રે તસ્મા᳚ત્ । તસ્મા᳚જ્જા॒તા અ॑જા॒વય॑ઃ ।
સુરેશ પદ્મચરણ હસ્તામલક તોટકૈઃ ।
અન્યૈશ્ચ શિષ્યૈઃ સંવીત પુષ્પમાલાં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - પુષ્પમાલિકાં
સમર્પયામિ ॥

॥ અથ પત્રપૂજા ॥

ॐ શિવરૂપાય નમઃ - બિલ્વપત્રં સમર્પયામિ ।
ॐ શક્તિરૂપાય નમઃ - કદમ્બપત્રં સમર્પયામિ ।
ॐ વિષ્ણુરૂપાય નમઃ - તુલસીપત્રં સમર્પયામિ ।
ॐ લક્ષ્મીરૂપાય નમઃ - તામરસપત્રં સમર્પયામિ ।
ॐ બ્રહ્મરૂપાય નમઃ - દાડિમીપત્રં સમર્પયામિ ।
ॐ સરસ્વતીરૂપાય નમઃ - મલ્લિકાપત્રં સમર્પયામિ ।
ॐ ગણપતિરૂપાય નમઃ - દૂર્વાપત્રં સમર્પયામિ ।
ॐ ષણ્મુખરૂપાય નમઃ - મરુવકપત્રં સમર્પયામિ ।
ॐ શ્રીચક્ર રૂપાય નમઃ - અશોકપત્રં સમર્પયામિ ।
ॐ શ્રીદક્ષિણામૂર્તિરૂપાય નમઃ - નાનાવિધ પત્રાણિ સમર્પયામિ
॥

॥ અથ પુષ્પપૂજા ॥

ॐ શિવરૂપાય નમઃ - જાતીપુષ્પં સમર્પયામિ ।
ॐ શક્તિરૂપાય નમઃ - કદમ્બપુષ્પં સમર્પયામિ ।

ॐ વિષ્ણુરૂપાય નમઃ - તુલસીપુષ્પં સમર્પયામિ ।
ॐ લક્ષ્મીરૂપાય નમઃ - પદ્મપુષ્પં સમર્પયામિ ।
ॐ બ્રહ્મરૂપાય નમઃ - શ્વેતકમલપુષ્પં સમર્પયામિ ।
ॐ સરસ્વતીરૂપાય નમઃ - મલ્લિકાપુષ્પં સમર્પયામિ ।
ॐ ગણપતિરૂપાય નમઃ - કલ્હારપુષ્પં સમર્પયામિ ।
ॐ ષણ્મુખરૂપાય નમઃ - જપાપુષ્પં સમર્પયામિ ।
ॐ શ્રીચક્ર રૂપાય નમઃ - અશોકપુષ્પં સમર્પયામિ ।
ॐ શ્રીદક્ષિણામૂર્તિરૂપાય નમઃ - નાનાવિધ પુષ્પાણિ સમર્પયામિ ॥

॥ શ્રીશઙ્કરાચાર્યાષ્ટોત્તરશતનામાવલિઃ ॥

ॐ શ્રીમત્કૈલાસનિલયશઙ્કરાય નમો નમઃ ।
ॐ બ્રહ્મવિદ્યાડમ્બિકાશ્લિષ્ટવામાઙ્ગાય નમો નમઃ ।
ॐ બ્રહ્મોપેન્દ્રમહેન્દ્રાદિપ્રાર્થિતાય નમો નમઃ ।
ॐ ભક્તાનુગ્રહણૈકાન્તશાન્તસ્વાન્તાય તે નમઃ ।
ॐ નાસ્તિકાક્રાન્તવસુધા પાલકાય નમો નમઃ ।
ॐ કર્મકાણ્ડાવનસ્કન્દપ્રેષકાય નમો નમઃ ।
ॐ લોકાનુગ્રહણોપાત્તનૃદેહાય નમો નમઃ ।
ॐ કાલટીક્ષેત્રવાસાદિરસિકાય નમો નમઃ ।
ॐ પૂર્ણાનદીતીરવાસલોલુપાય નમો નમઃ ।
ॐ વિદ્યાધિરાજસદ્વંશપાવનાય નમો નમઃ ॥ ૧૦ ॥

ॐ આર્યામ્બિકાગર્ભવાસનિર્ભરાય નમો નમઃ ।
ॐ શિવગુર્વાપ્તસુકૃતસત્ફલાય નમો નમઃ ।
ॐ આર્યાશિવગુરુપ્રીતિભાજનાય નમો નમઃ ।
ॐ ઈશ્વરાબ્ધીયવૈશાખપઞ્ચમીજન્મને નમઃ ।
ॐ નિજાવતારાનુગુણ શઙ્કરાખ્યાભૃતે નમઃ ।
ॐ નામસંખ્યાસમુન્નેયજન્મકાલાય તે નમઃ ।
ॐ શઙ્કરાખ્યાસુવિખ્યાતમઙ્ગલાય નમો નમઃ ।
ॐ પિતૃદત્તાન્વર્થભૂતનામધેયાય તે નમઃ ।
ॐ બાલલીલાતોષિતસ્વમાતૃકાય નમો નમઃ ।
ॐ પ્રથમાબ્દાભ્યસ્તનાનાભાષાઢ્યાય નમો નમઃ ॥ ૨૦ ॥

ॐ દ્વિતીયાબ્દકૃતસ્વીયસચ્ચૂડાકૃતયે નમઃ ।
ॐ નિજતાતવિયોગાર્તમાત્રાશ્વાસકૃતે નમઃ ।
ॐ માતૃકારિતસદ્વિપ્રસમ્સ્કારાય નમો નમઃ ।
ॐ પલાશદણ્ડમૌઞ્જ્યાદિભાસુરાય નમો નમઃ ।
ॐ સન્ધ્યાગ્નિસેવાનુષ્ઠાનનિરતાય નમો નમઃ ।
ॐ વિદ્યાગુરુકુલૈકાન્તનિવાસાય નમો નમઃ ।
ॐ વિદ્યાગ્રહણનૈપુણ્યવિસ્માપનકૃતે નમઃ ।
ॐ અભ્યસ્યવેદવેદાઙ્ગસન્દોહાય નમો નમઃ ।
ॐ ભિક્ષાશનાદિનિયમપાલકાય નમો નમઃ ।
ॐ વિદ્યાવિનયસમ્પત્તિવિખ્યાતાય નમો નમઃ ॥ ૩૦ ॥

ॐ ભિક્ષામલકસન્દાતૃસતીશોકહૃતે નમઃ ।
ॐ સ્વર્ણામલકસદ્વૃષ્ટિકારકાય નમો નમઃ ।
ॐ ન્યાયસાંખ્યાદિશાસ્ત્રાબ્ધિમથનાય નમો નમઃ ।
ॐ જૈમિનીયનયાર્ણોધિકર્ણધારાય તે નમઃ ।
ॐ પાતઞ્જલનયારણ્યપઞ્ચાસ્યાય નમો નમઃ ।
ॐ માતૃશુશ્રૂષણાસક્તમાનસાય નમો નમઃ ।
ॐ પૂર્ણાસામીપ્યસન્તુષ્ટમાતૃકાય નમો નમઃ ।
ॐ કેરલેશકૃતગ્રન્થપ્રેક્ષકાય નમો નમઃ ।
ॐ દત્તરાજોપહારાદિનિરાશાય નમો નમઃ ।
ॐ સ્વાવતારફલપ્રાપ્તિનિરીક્ષણકૃતે નમઃ ॥ ૪૦ ॥

ॐ સન્યાસગ્રહણોપાયચિન્તકાય નમો નમઃ ।
ॐ નક્રગ્રહમિષાવાપ્તમાત્રાજ્ઞાય  નમો નમઃ ।
ॐ પ્રૈષોચ્ચારણસંત્યક્તનક્રપીડાય તે નમઃ ।
ॐ અન્ત્યકાલસ્વસાનિધ્યશમ્સકાય નમો નમઃ ।
ॐ ગોવિન્દભગવત્પાદાન્વેષકાય નમો નમઃ ।
ॐ ગોવિન્દશિષ્યતાપ્રાપ્તિપ્રશમ્સનકૃતે નમઃ ।
ॐ આર્યપાદમુખાવાપ્તબ્રહ્મવિદ્યાય તે નમઃ ।
ॐ નર્મદાતટિનીતીરસ્તમ્ભકાય નમો નમઃ ।
ॐ ગુર્વનુજ્ઞાતવિશ્વેશદર્શનાય નમો નમઃ ।
ॐ વારાણસીવિશ્વનાથક્ષેત્રગાય  નમો નમઃ ॥ ૫૦ ॥

ॐ ચણ્ડાલાકૃતિવિશ્વેશવાદસંશ્રાવિણે નમઃ ।

ૐ મનીષાપઞ્ચકસ્તોત્રશ્રાવકાય નમો નમઃ ।
ૐ સાક્ષાત્કૃતમહાદેવસ્વરૂપાય નમો નમઃ ।
ૐ ગુરુવિશ્વેશ્વરાજ્ઞપ્તભાષ્યગ્રન્થકૃતે નમઃ ।
ૐ નાનાભાષ્યપ્રકરણસ્તોત્રજાતકૃતે નમઃ ।
ૐ દેવતાગુરુવિપ્રાદિભક્તિસંધુક્ષિણે નમઃ ।
ૐ ભાષ્યાદ્યધ્યાપનાસક્તમાનસાય નમો નમઃ ।
ૐ આનન્દાદિશિષ્યૌઘસંવૃતાય નમો નમઃ ।
ૐ પદ્મપાદાભિધાલાભહૃષ્ટશિષ્યાય તે નમઃ ।
ૐ આચાર્યભક્તિમાહાત્મ્યનિદર્શનકૃતે નમઃ ॥ ૬૦ ॥

ૐ વૃદ્ધવ્યાસપરામૃષ્ટભાષ્યાર્થાય નમો નમઃ ।
ૐ વ્યાસપ્રશંસિતાશેષભાષ્યજાતાય તે નમઃ ।
ૐ તત્તત્પ્રશ્નોત્તરશ્રોતૃવ્યાસપ્રીતિકૃતે નમઃ ।
ૐ નારાયણાવતારત્વસ્મારકાય નમો નમઃ ।
ૐ વેદવ્યાસવરપ્રાપ્તષોડશાબ્દાયુષે નમઃ ।
ૐ કુમારિલજયાશંસાશંસકાય નમો નમઃ ।
ૐ તુષાગ્નિસ્થિતભટ્ટોક્તિશ્લાઘકાય નમો નમઃ ।
ૐ સુબ્રહ્મણ્યાવતારશ્રીભટ્ટાનુગ્રાહિણે નમો નમઃ ।
ૐ મણ્ડનાખ્યમહાસૂરિવિજયાશંસિને નમઃ ।
ૐ માહિષ્મતીપુરોપાન્તપાવનાય નમો નમઃ ॥ ૭૦ ॥

ૐ શુકસૂચિતતદ્ગેહદર્શકાય નમો નમઃ ।
ૐ વાદભિક્ષાપેક્ષણાદિસ્વાશયોદ્ઘાટિને નમઃ ।
ૐ વ્યાસજૈમિનિસાનિધ્યવાવદૂકાય તે નમઃ ।
ૐ મણ્ડનીયપ્રશ્નજાતોત્તરદાત્રે નમો નમઃ ।
ૐ મધ્યસ્થભારતીવાક્યપ્રમાણાય નમો નમઃ ।
ૐ માલામાલિન્યનિર્વિણ્ણમણ્ડનાર્યજિતે નમઃ ।
ૐ પ્રવૃત્તિમાર્ગપારમ્યવારકાય નમો નમઃ ।
ૐ કર્મકાણ્ડીયતાત્પર્યોદ્ધારકાય નમો નમઃ ।
ૐ જ્ઞાનકાણ્ડપ્રમાણત્વસમર્થનકૃતે નમઃ ।
ૐ યુક્તિસાહસ્રતોઽદ્વૈતસાધકાય નમો નમઃ ॥ ૮૦ ॥

ૐ જીવબ્રહ્મૈક્યસિદ્ધાન્તસંસ્થાપનકૃતે નમઃ ।
ૐ નિજાપજયનિર્વિણ્ણમણ્ડનેડ્યપદે નમઃ ।

ૐ સન્યાસકૃન્મણ્ડનાનુગ્રાહકાય  નમો નમઃ ।
ૐ મહાવાક્યોપદેશાદિદાયકાય નમો નમઃ ।
ૐ સુરેશ્વરાભિધાજુષ્ટશિષ્યાનુગ્રાહિણે નમઃ ।
ૐ વનદુર્ગામન્ત્રબદ્ધભારતીવપુષે નમઃ ।
ૐ શૃઙ્ગાદ્રિક્ષેત્રસાનિધ્યપ્રાર્થકાય નમો નમઃ ।
ૐ શ્રીશારદાદિવ્યમૂર્તિસ્થાપકાય નમો નમઃ ।
ૐ શૃઙ્ગાદ્રિશારદપીઠસંસ્થાપનકૃતે નમઃ ।
ૐ દ્વાદશાબ્દનિજાવાસપૂતશૃઙ્ગાદ્રયે નમઃ ॥ ૯૦ ॥

ૐ પ્રત્યહં ભાષ્યપાઠાદિકાલક્ષેપકૃતે નમઃ ।
ૐ અન્ત્યકાલસ્મૃતિપ્રાપ્તમાતૃપાર્શ્વાય તે નમઃ ।
ૐ માતૃસંસ્કારનિર્વ્યૂઢપ્રતિજ્ઞાય નમો નમઃ ।
ૐ પઞ્ચપાદીસમુદ્ધારપ્રીતપદ્માઙ્ઘ્રયે નમઃ ।
ૐ સ્વવધોદ્યુક્તકાપાલિકોપેક્ષણકૃતે નમઃ ।
ૐ સ્વશિષ્યમારિતસ્વીયમારકાય નમો નમઃ ।
ૐ પરકાયપ્રવેશાદિયોગસિદ્ધિમતે નમઃ ।
ૐ લક્ષ્મીનૃસિંહકરુણાશાન્તદેહાધયે નમઃ ।
ૐ ગોકર્ણનાથમૂકામ્બાસન્દર્શનકૃતે નમઃ ।
ૐ મૃતપુત્રોજ્જીવનાદિમહાશ્ચર્યકૃતે નમઃ ॥ ૧૦૦ ॥

ૐ મૂકબાલકસમ્ભાષાદ્યમાનુષકૃતે નમઃ ।
ૐ હસ્તામલકનામાઢ્યશિષ્યોપેતાય તે નમઃ ।
ૐ ચતુર્દિક્ચતુરામ્નાયસ્થાપકાય નમો નમઃ ।
ૐ તોટકાભિધસચ્છિષ્યસંગ્રહાય નમો નમઃ ।
ૐ હસ્તતોટકપદ્માંઘ્રિસુરેશારાધ્ય તે નમઃ ।
ૐ કાશ્મીરગતસર્વજ્ઞપીઠગાય નમો નમઃ ।
ૐ કેદારાન્તર્ધિકૈલાસપ્રાપ્તિકર્ત્રે નમો નમઃ ।
ૐ કૈલાસાચલસંવાસિપાર્વતીશાય તે નમઃ ।
ૐ મઙ્ગલૌઘલસત્સર્વમઙ્ગલાપતયે નમઃ ॥ ૧૦૮ ॥

ધૂપમ્

ૐ યત્પુરુ॑ષં॒ વ્ય॑દધુઃ । ક॒તિ॒ધા વ્ય॑કલ્પયન્ । મુ॒ખં
કિમ॑સ્ય॒ કૌ બા॒હૂ । કાવૂ॒રૂ પાદા॑વુચ્યેતે ।

ૐ ધૂરસિ ધૂર્વ ધૂર્વન્તં ધૂર્વતં યોઽસ્માન્
ધૂર્વતિતં ધૂર્વયં વયં ધૂર્વામસ્ત્વં
દેવાનામસિ। સસ્નિતમં પપ્રિતમં જુષ્ટતમં
વહ્નિતમં દેવહૂતમમહૃતમસિ હવિર્ધાનં
દૃꣳહસ્વ માહ્વાર્મિત્રસ્ય ત્વા ચક્ષુષા પ્રેક્ષે
માભેર્મા સંવિક્થા મા ત્વા હિꣳસિષમ્ ॥

સર્વજ્ઞપીઠિકારોહસમુત્સુકિતમાનસ ।
સર્વજ્ઞમૂર્તે સર્વાત્મન્ ધૂપમાજિઘ્ર સાદરમ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ધૂપમાઘ્રાપયામિ ॥

દીપમ્
ૐ બ્રાહ્મણોઽસ્ય મુખમાસીત્ । બાહૂ રાજન્યઃ
કૃતઃ । ઊરૂ તદસ્ય યદ્વૈશ્યઃ । પદ્ભ્યાꣳ શૂદ્રો
અજાયત ॥

ઉદ્દીપ્યસ્વ જાતવેદોઽપઘ્નન્નિરૃતિં મમ ।
પશૂꣳશ્ચ મહ્યમાવહ જીવનં ચ દિશો દિશ ।
માનો હિꣳસીજ્જાતવેદો ગામશ્વં પુરુષં જગત્ ।
અબિભ્રદગ્ન આગહિ શ્રિયા મા પરિપાતય ॥

સરસ્વતીકૃતપ્રશ્નોત્તરદાનવિચક્ષણ ।
શ઼ૃઙ્ગાદ્રિસ્થાનતત્સંસ્થાકારિન્ દીપં ગૃહાણ ભોઃ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - દીપં દર્શયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - ધૂપદીપાનન્તરં આચમનીયમાચમનીયં સમર્પયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - આચમનાનન્તરં પરિમલપત્રપુષ્પાણિ સમર્પયામિ ॥

નૈવેદ્યમ્
[નૈવેદ્યપદાર્થાન્ ગાયત્ર્યા પ્રોક્ષ્ય]

ૐ ભૂર્ભુવસ્સુવઃ તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય
ધીમહિ ધિયો યો નઃ પ્રચોદયાત્ ॥

સત્યં ત્વર્તેન પરિષિઞ્ચામિ ॥

કામધેનું સ્મરામિ [ધેનુમુદ્રાં પ્રદર્શ્ય]
અમૃતમસ્તુ । અમૃતોપસ્તરણમસિ ॥

ૐ પ્રાણાય સ્વાહા ।
ૐ અપાનાય સ્વાહા ।
ૐ વ્યાનાય સ્વાહા ।
ૐ ઉદાનાય સ્વાહા ।
ૐ સમાનાય સ્વાહા ।
ૐ બ્રહ્મણે સ્વાહા ॥

ૐ ચન્દ્રમા મનસો જાતઃ । ચક્ષોસ્સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ । પ્રાણાદ્વાયુરજાયત ।
ષણ્મતસ્થાપનાચાર્ય ષડ્દર્શનવિશારદ ।
ગૃહાણ ષડ્રસોપેતં ભક્ષ્યભોજ્યાદિકં પ્રભો ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - નૈવેદ્યં
સમર્પયામિ ॥

સર્વદિક્ ચતુરામ્નાયવ્યવસ્થાપક શઙ્કર ।
સર્વલોકૈકસમ્પૂજ્ય પાનીયં પ્રતિગૃહ્યતામ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - મધ્યે મધ્યે
અમૃતપાનીયં સમર્પયામિ ॥

અમૃતાપિધાનમસિ - ઉત્તરાપોશનં સમર્પયામિ ।
શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - હસ્તપ્રક્ષાળનં
સમર્પયામિ । ગણ્ડૂષં સમર્પયામિ । પાદપ્રક્ષાળનં સમર્પયામિ ।
આચમનીયમાચમ્નીયં સમર્પયામિ । કરોદ્વર્તનં સમર્પયામિ ॥

તામ્બૂલમ્
ૐ નાભ્યા આસીદન્તરિક્ષમ્ । શીર્ષ્ણો દ્યૌસ્સમવર્તત ।

પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ । તથા લોકા ँ
અકલ્પયન્ ॥

સર્વલોકસુવિખ્યાત યશોરાશિનિશાકર ।
સર્વાત્મભૂત સુગુરો તામ્બૂલં પ્રદદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - પૂગીફલ
તામ્બૂલં સમર્પયામિ ॥

મઙ્ગલનીરાજનમ્
ૐ વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં
તમસસ્તુ પારે। સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ ।
નામાનિ કૃત્વાऽભિવદન્ યદાસ્તે ॥

સોમો વા એતસ્ય રાજ્યમાદત્તે । યો રાજા સન્રાજ્યો વા
સોમેન યજતે । દેવસુવામેતાનિ હવી ँ ષિ
ભવન્તિ । એતાવન્તો વૈ દેવાના ँ સવાઃ । ત
એવાસ્મૈ સવાન્ પ્રયચ્છન્તિ । ત એનં પુનસ્સુવન્તે
રાજ્યાય । દેવસૂ રાજા ભવતિ ॥

સામ્રાજ્યં ભોજ્યં સ્વારાજ્યં વૈરાજ્યં પારમેષ્ઠિકં રાજ્યં
મહારાજ્યમાધિપત્યમ્ ॥

ન તત્ર સૂર્યો ભાતિ ન ચન્દ્રતારકં નેમા વિદ્યુતો ભાન્તિ
કુતોऽયમગ્નિઃ ।
તમેવ ભાન્તમનુભાતિ સર્વં તસ્ય ભાસા સર્વમિદં
વિભાતિ ॥

પ્રસ્થાનત્રયીભાષ્યનિર્માણૈક વિશારદ ।
અજ્ઞાનતિમિરોત્સારિન્ પશ્ય નીરાજનપ્રભામ્ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
દિવ્યમઙ્ગલનીરાજનં દર્શયામિ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - નીરાજનાનન્તરં
આચમનીયમાચમનીયં સમર્પયામિ । આચમનાનન્તરં

પરિમલપત્રપુષ્પાણિ સમર્પયામિ ॥

રક્ષાધારણમ્

ૐ બૃહત્ સામ ક્ષત્રભૃદ્વૃદ્ધવૃષ્ણિયં
ત્રિષ્ટુભૌજશ્શુભિતમુગ્રવીરમ્ । ઇન્દ્રસ્તોમેન
પઞ્ચદશેન મધ્યમિદં વાતેન સગરેણ રક્ષ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - રક્ષાં ધારયામિ
॥

મન્ત્રપુષ્પમ્

ૐ ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્
પ્રદિશશ્ચતસ્રઃ । તમેવં વિદ્વાનમૃત ઇહ
ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે ॥

રાજાધિરાજાય પ્રસહ્યસાહિને । નમો વયં
વૈશ્રવણાય કુર્મહે । સ મે કામાન્ કામકામાય
મહ્યમ્ । કામેશ્વરો વૈશ્રવણો દદાતુ । કુબેરાય
વૈશ્રવણાય । મહારાજાય નમઃ ॥

શ્રીવિદ્યાદિમહામન્ત્રમાહાત્મ્યપરિદર્શક ।
મન્ત્રસારજ્ઞ ભગવન્ મન્ત્રપુષ્પં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - મન્ત્રપુષ્પં
સમર્પયામિ ॥

પ્રદક્ષિણા

ૐ યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ
પ્રથમાન્યાસન્ । તે હ નાકં મહિમાનસ્સચન્તે । યત્ર
પૂર્વે સાધ્યાસ્સન્તિ દેવાઃ ॥

પ્રદક્ષિણીકૃતાશેષ ભારતાજિર શઙ્કર ।
પ્રદક્ષિણં કરોમિ ત્વાં પ્રસન્નવદનામ્બુજ ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - અનન્તકોટિ
પ્રદક્ષિણનમસ્કારાન્ સમર્પયામિ ॥

પ્રસન્નાર્ઘ્યમ્

ૐ તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ તન્નો રુદ્રઃ
પ્રચોદયાત્ ॥

પ્રસન્નહૃદયામ્ભોજ પ્રપન્નાર્તિપ્રભઞ્જન ।
પ્રકૃષ્ટજ્ઞાનમાહાત્મ્ય પ્રસન્નાર્ઘ્યં દદામિ તે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ -
ઇદમર્ઘ્યમિદમર્ઘ્યમિદમર્ઘ્યમ્ ॥

પ્રાર્થના

અનેકજન્મસમ્પ્રાપ્ત કર્મબન્ધવિદાહિને ।
આત્મજ્ઞાનપ્રદાનેન તસ્મૈ શ્રીગુરવે નમઃ ॥

જ્ઞાનં દેહિ યશો દેહિ વિવેકં બુદ્ધિમેવ ચ ।
વૈરાગ્યં ચ શિવાં વિદ્યાં નિર્મલાં ભક્તિમન્વહમ્ ॥

અદ્વૈતસારસર્વસ્વ સંગ્રહોત્સુકમાનસ ।
શિષ્યોપદેશપ્રણયિન્ પ્રાર્થનાં તે સમર્પયે ॥

શ્રીશઙ્કરભગવત્પાદાચાર્યસ્વામિને નમઃ - પ્રાર્થયામિ ॥

પુનઃ પૂજા

છત્રં ધારયામિ - ચામરં વીજયામિ - ગીતં શ્રાવયામિ -
વાદ્યં ઘોષયામિ - નૃત્તં દર્શયામિ - આન્દોલિકામારોપયામિ -
અશ્વમારોપયામિ - ગજમારોપયામિ - રથમારોપયામિ -
ધ્વજારોહણં સમર્પયામિ ॥

શ્રીપૂર્ણાતટિનીતરઙ્ગપટલી પૂરોદરોદિત્વર
સ્ફીતાંભઃકણ શીતલાનિલ પરિસ્પન્દાધિકાનન્દિત ।
કાલટ્યાખ્ય પુરોલ્લસચ્છિવગુરુસ્થાન પ્રદીપાઙ્કુર
શ્રીમચ્છઙ્કરદેશિકોત્તમ વિભો ઋગ્વેદમાકર્ણય ॥

શ્રીમત્કૈલાસાચલકૃતાધિવાસ શ્રીપતિપ્રમુખસુરવર પ્રાર્થિત
ભૂલોકવાસ ઋગ્વેદપ્રિય ઋગ્વેદમવધારય ।
ૐ અગ્નિમીળે પુરોહિતં યજ્ઞસ્ય દેવમૃત્વિજમ્ ।
હોતારં રત્નધાતમમ્ ॥

કલ્યાતઙ્કુ નિરઙ્કુશસ્ય જગતઃ કલ્યાણસન્દાયક
બ્રહ્મેન્દ્રાદિ સમસ્તદેવ નિકુરુમ્ભાભ્યર્થના સાધક ।
શ્રીમત્કાલટિપુણ્યભૂપરિસર પ્રાપ્તાવતારોજ્જ્વલ
વિદ્યારાજકુલાબ્ધિચન્દિર યજુર્વેદં ત્વમાકર્ણય ॥

સમાશ્રિત વૃષાચલેશ્વર સ્વયમ્ભૂલિઙ્ગ સમાદૃત સ્વાશ્રિત
ભક્તજન પ્રાર્થનાપૂરણ વ્યતિષઙ્ગ યજુર્વેદપ્રિય
યજુર્વેદમવધારય ।
ૐ ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય
માઽમૃતાત્ ॥

આર્યામ્બા મુખપઙ્કજાર્ક શિવગુર્વાનન્દસન્દોહન
સ્વાચાર્યાધિગતાખિલ શ્રુતિતતે સચ્છાસ્ત્રપારઙ્ગત ।
ગ્રાહગ્રાસમિષાત્ સ્વમાતૃકૃતસન્યાસાભ્યનુજ્ઞાનુગ
શ્રીમચ્છઙ્કર સામવેદમધુના સાનન્દમાકર્ણય ॥

સફલીકૃતાર્યામ્બાશિવગુરુ મનોરથ
વિશદીકૃતાત્મવિદ્યાવિચાર વિકલીકૃતમન્મથ સામવેદપ્રિય
સામવેદમવધારય ।
ૐ અગ્ન આયાહિ વીતયે ગૃણાનો હવ્યદાતયે । નિ હોતા
સત્સિ બર્હિષિ ॥

શ્રીગોવિન્દમુખોદ્ગત શ્રુતિશિરોવાક્યોપદેશાદૃત
શ્રીવિશ્વેશ્વર દર્શનોત્સુક વિભો કાશીનિવાસપ્રિય ।
સમ્સારાર્તસનન્દનાદિકૃતિનાં સન્યાસદીક્ષાગુરો
સામોદં ત્વમથર્વવેદમધુના સ્વામિન્ સમાકર્ણય ॥

ૐ શં નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે । શં
યો રભિસ્રવન્તુ નઃ ॥

ગીતાવાક્ય તતેર્દશોપનિષદાં શ્રીવ્યાસસૂત્રાવલેઃ
પ્રસ્થાનત્રિતયસ્ય નિસ્તુલ મહાભાષ્યપ્રણેતઃ પ્રભો ।
વારાણસ્યુપસન્ન શિષ્યજનતાભાષ્યોપદેશોત્સુક
સ્વાધીનીકૃત સર્વશાસ્ત્રવિતતે શાસ્ત્રં સમાકર્ણય ॥

નિજપાદામ્સુ પરિપાવિત કાલટીક્ષેત્ર નિજપુણ્યાવતાર
પરિષ્કૃતાત્રેયગોત્ર શાસ્ત્રાર્થપ્રિય શાસ્ત્રમવધારય ।
ૐ અથાતો દર્શપૂર્ણમાસૌ વ્યાખ્યાસ્યામઃ । પ્રાતરગ્નિહોત્રં હુત્વા
અન્યમાહવનીયં પ્રણીય અગ્નીનન્વાદધાતિ ॥

વૃદ્ધબ્રાહ્મણ બાદરાયણકૃતપ્રશ્નોત્તરાત્યુત્સુક
સૂત્રૌઘ સ્વરસાર્થ વર્ણન સુસંતુષ્યન્મુનિશ્લાઘિત ।
વ્યાસાજ્ઞાવશતઃ સ્વભાષ્ય વિશદીકાર પ્રચારોદ્યત
શુદ્ધાદ્વૈતમતપ્રસારણપટો પ્રીત્યા પુરાણં શ‍ૃણુ ॥

સ્વમહિમ સમ્પ્રાપિત સૌવર્ણવર્ષ સમુત્પાદિત
દીનતરદ્વિજસતીહર્ષ પુરાણપઠનપ્રિય પુરાણમવધારય ।
ૐ પરિત્રાણાય સાધૂનાં વિનાશાય ચ દુષ્કૃતાં ।
ધર્મસંસ્થાપનાર્થાય સમ્ભવામિ યુગે યુગે ॥

ક્ષમાપ્રાર્થના
આવાહનં ન જાનામિ ન જાનામિ વિસર્જનમ્ ।
પુજાવિધિં ન જાનામિ ક્ષમસ્વ ગુરુસત્તમ ॥

અન્યથા શરણં નાસ્તિ ત્વમેવ શરણં મમ ।
તસ્માત્કારુણ્યભાવેન રક્ષ રક્ષ જગદ્ગુરો ॥

અપરાધસહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
દાસોઽયમિતિ માં મત્વા ક્ષમસ્વ ગુરુપુઙ્ગવ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુદ્ધ્યાત્મના વા પ્રકૃતેઃ
સ્વભાવાત્ ।
કરોમિ યદ્યત્સકલં પરસ્મૈ શ્રીશઙ્કરાયેતિ સમર્પયામિ ॥

હૃત્પદ્મકર્ણિકામધ્યં સ્વશિષ્યૈઃ સહ શઙ્કર ।
પ્રવિશ ત્વં મહાદેવ સર્વલોકૈકનાયક ॥

[ઇતિ નિર્માલ્યમાઘ્રાય સ્તોત્રાદિકં પઠેત્]
યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપઃ પૂજા કૃયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ॥

મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં જગદ્ગુરો ।
યત્પૂજિતં મયા દેવ પરિપૂર્ણં તદસ્તુ મે ॥

અનેન મયા કૃત પૂજયા શ્રીશઙ્કરભગવત્પાદાચાર્યઃ
પ્રીયતામ્ ॥

મધ્યે મન્ત્ર તન્ત્ર સ્વર વર્ણ ધ્યાન નિયમ ન્યૂનાતિરિક્ત લોપદોષ
પ્રાયશ્ચિત્તાર્થં નામત્રયજપમહં કરિષ્યે ॥

ૐ અચ્યુતાય નમઃ ૐ અનન્તાય નમઃ ૐ ગોવિન્દાય નમઃ [ત્રિઃ]
ૐ અચ્યુતાનન્તગોવિન્દેભ્યો નમો નમઃ ॥

પ્રાયશ્ચિત્તાન્યશેષાણિ તપઃકર્માત્મકાનિ વૈ ।
યાનિ તેષામશેષાણાં કૃષ્ણાનુસ્મરણં પરમ્ ॥

શ્રીકૃષ્ણ-કૃષ્ણ-કૃષ્ણ
ૐ હર ૐ હર ૐ હર
॥ શ્રીમહાત્રિપુરસુન્દરી ચરણારવિન્દાર્પણમસ્તુ ॥

Compiled and encoded by Harsha Ramamurthy
(harsha_ramamurthy at mail.com)

---

*AdishankarAchAryapUjAvidhI*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*